शब्दच० । २श्रीयुक्ते त्रि० अमरः स्त्रियां ङीप् । ३श्वेतरोहितकवृक्षे पु० राजनि० ।

**लक्ष्मीसहज** पु० लक्ष्म्या सह क्षीराब्धौ जायते जन-ड । १चन्द्रे, शब्दच० २उच्चैःश्रवसि ३कर्पूरे च ।

**लक्ष्य** न० लक्ष-यत् । १वेधार्थमुद्दिश्यमाने शरव्ये अमरः । २लक्षणाबोध्येऽर्थे, ३उद्देश्ये, ४ज्ञेये, ५अनुमेये च त्रि० ।

**लक्ष्यासन** न० रुद्रजा० उक्ते आसनभेदे । "अथ लक्ष्यासनं वक्ष्ये जिह्वाग्रेऽङ्घ्रितलद्वयम् । गुह्यदेशे हस्तयुग्मं तला-भ्यामवलम्बयेत् भुवि" ।

**लख** गतौ भ्वा० पर०सक० सेट् । लखति । अलखीत्-अला-खीत् । इदित्त्वपक्षम् लङ्खति अलङ्खीत् ।

**लग** खञ्जीभावे अक०गतौ सक०भ्वा०प०सेट् । लङ्गति अलङ्गीत्

**लग** सङ्गे भ्वा० पर० सक० सेट् । लगति एदित् अलगीत् घटा० लगयति । "छायेव तस्या लगति स्म पश्चात्" नैष० ।

**लग** स्वादे प्राप्तौ च सक०चु०उभ०सेट् । लागयति ते अली-लगत् त ।

**लगित** त्रि० लग-क्त । संसक्ते ।

**लगुड(ल)(र)** पु० लग-उलच् लस्य डरौ वा । दण्डाकारे काष्ठनिर्मिते पदार्थे (लाठी) अमरः ।

**लग्न** न० लस्ज-क्त तस्य नः । १मेषादिराशीनामुदये अमरः । २लज्जिते त्रि० । लग-क्त पृषो० । ३संसक्ते त्रि० । ४स्तुतिपाठके पु० त्रिका० । लग्न इव इवार्थे कन् । ५प्रतिभुवि । (जामिन) "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदि" इति स्मृतिः । मेषादिराश्युदय-रूपलग्नपदार्थस्य देशभेदे कालमानं खगोलशब्दे २४५२। ५३पृ० दर्शितम् । इष्टकाले लग्नसाधनञ्च २८०२पृ० दृश्यम् ।

**लग्निका** स्त्री नग्नेव कन् पृषो० । अदृष्टरजस्कायां स्त्रियाम् अमरटीका ।

**लघ** अभोजने सीमातिक्रमे गतौ च भ्वा०आ०सक०सेट् इदित् । लङ्घते अलङ्घिष्ट । "कश्चोज्जिनीवल्लभमुल्ललङ्घे" महाना० ।

**लघ** शोषे भ्वा० पर० सक०सेट् इदित् । लङ्घति अलङ्घीत् ।

**लघ** प्रकाशे चु०उभ०स०सेट् इदित् । लङ्घयति ते अललङ्घत् त

**लघ** आस्वादने चु०उभ०सक०सेट् । लाघयति-ते अलीलघत्-त

**लघट्(टि)** पु० लघि-शोषे "लङ्घेर्नलोपश्च" उणा०अटि: इकार उच्चारणार्थः उज्ज्वल० पारायणे तु न तथा । वायौ ।

**लघिमन्** पु० लघोर्भावः इमनिच् डिच्च । १लघुत्वे लाघवे, येनोर्द्ध्वगतिसम्भवः । २ऐश्वर्य्यभेदे च ।

**लघिष्ठ** त्रि० अतिशयेन लघुः इष्ठन् डित् । अतिशय-लघुत्वयुक्ते । ईयसुन् । लघीयानप्यत्र स्त्रियां ङीप् ।

**लघु** न० लघि-कु नि०नलोपः । १शीघ्रे अमरः । २कृष्णागुरुणि मेदि० । ३वीरणमूले राजनि० । ४पृक्कानामौषधौ स्त्री मेदि० । ५निःसारे, ६लाघवगुणान्विते, ७ह्रस्वे, ८मनोहरे च त्रि० मेदि० । व्याकरणोक्ते ह्रस्वसंज्ञके ९अकारादौ वर्णे, ज्योतिषोक्तेषु "पुष्याश्विहस्ता लघुः" इत्युक्तेषु १०पुष्यादिनक्षत्रेषु च पु० । ११लघुतावत्यां स्त्रियां स्त्री वा ङीप् । तत्कृतौ णिच् लघयति ।

**लघुकाय** पुंस्त्री० लघुः कायो यस्य । १छागे त्रिका० स्त्रियां योपधत्वात् टाप् । कर्म० । २क्षुद्रशरीरे पुंन० ।

**लघुकाश्मर्य्य** पु० नित्यकर्म० । कट्फले वृक्षे राजनि० ।

**लघुचिर्भिटा** स्त्री नि०कर्म० । मृगेर्वारौ कर्कटीभेदे राजनि० ।

**लघुदन्ती** स्त्री कर्म० । क्षुद्रदन्तीवृक्षे ।

"दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्म-शूलास्रकण्डूकुष्ठविदाहनुत् । तीक्ष्णोष्णं हन्ति पि-त्तास्रं कफशोथोदरक्रिमीन्" "क्षुद्रदन्तीफलन्तु स्यान्म-धुरं रसपाकयोः । शीतलं हन्ति विण्मूत्रं गलशोथ कफापहम्" भावप्र० ।

**लघुद्राक्षा** स्त्री कर्म० । काकलीद्राक्षायाम् राजनि० ।

**लघुनामन्** पु० लघुवर्णयुक्तं नाम वाचकशब्दो यस्य । अ-गुरुचन्दने शब्दच० ।

**लघुपत्रक** पु० लघूनि ह्रस्वानि पत्राण्यस्य कप् । (गुड़ारो-चना) लताभेदे शब्दच० । वा भावे ङीप् । लघुपत्री स्त्री २अश्वत्थवृक्षे राजनि० ।

**लघुपुष्प** पु० लघु पुष्पं यस्य । भूमिकदम्बे राजनि० । [ङीप् ।

**लघुबदर** पु० कर्म० । १क्षुद्रकोलौ । २भूबदर्य्याम् स्त्री राजनि०

**लघुब्राह्मी** स्त्री कर्म० । क्षुद्रब्राह्म्याम् राजनि० ।

**लघुमन्थ** पु० । अग्निमन्थः मन्थः पूर्वपदलोपः कर्म० । क्षुद्रा-ग्निमन्थे राजनि० ।

**लघुलय** न० लघु शीघ्रं लीयते ली-अच् । वीरणमूले अमरः

**लघुसदाफला** स्त्री सदा फलं यस्याः कर्म० । क्षुद्रोदुम्बरि-कायाम् (छोट डुमुर) राजनि० ।

**लघुहेमदुग्धा** स्त्री कर्म० । क्षुद्रोडुम्बरे (छोट डुमुर) राजनि०

**लघूदुम्बरिका** स्त्री कर्म० । क्षुद्रोदुम्बरभेदे राजनि० ।

**लङ्का** स्त्री लक-अच् मुम् च । स्वनामख्यातायां १पुर्य्याम् । सा च भूगोलस्य याम्ये भूवृत्तपादविवरे समुद्रमध्ये स्थिता" सि० शि० । २शाखिशाखायां ३वेश्यायां ४शाखा-याश्च विश्वः ।